# .. shrIhanumatprashaMsanam ..

# ॥ શ્રીહનુમત્પ્રશંસનમ્ ॥

## Document Information

```
Text title : hanumatprashaMsanam
File name : hanumatprashaMsanam.itx
Location : doc_hanumaana
Author : madAnandatIrtha
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Processed by Sowmya Ramkumar
Proofread by : PSA Easwaran psaeaswaran at gmail
Description-comments : From Hanumatstutimanjari, Mahaperiaval
Publication
Latest update : September 18, 2014
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીહનુમત્પ્રશંસનમ્ ॥

મુક્તિપ્રદાનાત્ પ્રતિકર્તૃતા મે સર્વસ્ય બોધો ભવતાં ભવેત ।
હનૂમતો ન પ્રતિકર્તૃતા સ્યાત્ સ્વભાવભક્તસ્ય નિરૌષધં મે ॥ ૧॥

મદ્ભક્તૌ જ્ઞાનપૂર્તાવનુપધિકબલપ્રોન્નતિસ્થૈર્યધૈર્ય-
સ્વાભાવ્યાધિક્યતેજઃસુમતિદમશમેષ્વસ્ય તુલ્યો ન કશ્ચિત્ ।
શેષો રુદ્રઃ સુપર્ણોઽપ્યુરુગુણસમિતૌ નો સહસ્રાંશુતુલ્યા
અસ્યેત્યસ્માન્મદૈશં પદમહમમુના સાર્ધમેવોપભોક્ષ્યે ॥ ૨॥

પૂર્વં જિગાય ભુવનં દશકન્ધરોઽસા-
વબ્જોદ્ભવસ્ય વરતો ન તુ તં કદાચિત્ ।
કશ્ચિજ્જિગાય પુરુહૂતસુતઃ કપિત્વાદ્-
વિષ્ણોર્વરાદજયદર્જુન એવ ચૈનમ્ ॥ ૩ ॥

દત્તો વરો ન મનુજાન્ પ્રતિ વાનરાંશ્ચ
ધાત્રાસ્ય તેન વિજિતો યુધિ વાલિનૈષઃ ।
અબ્જોદ્ભવસ્ય વરમાશ્વભિભૂય રક્ષો
જિગ્યે ત્વહં રણમુખે બલિમાહ્વયન્તમ્ ॥ ૪॥

બલેર્દ્વાસ્થોઽહં વરમસ્મૈ સમ્પ્રદાય પૂર્વં તુ ।
તેન મયા રક્ષોઽસ્તં યોજનમયુતં પદાઙ્ગુલ્યા ॥ ૫॥

પુનશ્ચ યુદ્ધાય સમાહ્વયન્તં ન્યપાતયં રાવણમેકમુષ્ટિના ।
મહાબલોઽહં કપિલાખ્યરૂપસ્ત્રિકૂટરૂપઃ પવનશ્ચ મે સુતઃ ॥ ૬॥

આવાં સ્વશક્ત્યા જયિનાવિતિ સ્મ શિવો વરાન્તેઽજયદેનમેવમ્ ।
જ્ઞાત્વા સુરાજેયમિમં હિ વવ્રે હરો જયેયાહમમું દશાનનમ્ ॥ ૭॥

અતઃ સ્વભાવાજ્જયિનાવહં ચ વાયુશ્ચ વાયુર્હનુમાન્ સ એષઃ ।
અમુષ્ય હેતોસ્તુ પુરા હિ વાયુના શિવેન્દ્રપૂર્વા અપિ કાષ્ઠવત્કૃતાઃ ॥ ૮॥

અતો હનૂમાન્ પદમેતુ ધાતુર્મદાજ્ઞયા સૃષ્ટ્યવનાદિકર્મ ।
મોક્ષં ચ લોકસ્ય સદૈવ કુર્વન્ મુક્તશ્ચ મુક્તાન્ સુખયન્ પ્રવર્તતામ્ ॥ ૯॥

ભોગાશ્ચ યે યાનિ ચ કર્મજાતાન્યનાદ્યનન્તાનિ મમેહ સન્તિ ।
મદાજ્ઞયા તાન્યખિલાનિ સન્તિ ધાતુઃ પદે તત્ સહભોગનામ ॥ ૧૦॥

એતાદૃશં મે સહભોજનં તે મયા પ્રદત્તં હનુમન્ સદૈવ ।
ઇતીરિતસ્તં હનૂમાન્ પ્રણમ્ય જગાદ વાક્યં સ્થિરભક્તિનમ્રઃ ॥ ૧૧॥

ઇતિ શ્રીમદાનન્દતીર્થીયમહાભારતતાત્પર્યનિર્ણયતઃ શ્રીહનુમત્પ્રશંસનમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

.. shrIhanumatprashaMsanam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*